vedam nadam

# 9 - अथ नवम दशकम्
## ॥ जगत्सृष्टिप्रकारवर्णनं ॥

स्थितस्स कमलोद्भवस्तव हि नाभिपंकेरुहे
कुतस्स्विदिदमंबुधावुदितमित्यनालोकयन् ।
तदीक्षणकुतूहलात् प्रतिदिशं विवृत्ताननः
चतुर्वदनतामगाद् विकसदष्टदृष्ट्यंबुजाम् ॥ (9.1)

महार्णवविघूर्णितं कमलमेव तत्केवलं
विलोक्य तदुपाश्रयं तव तनुं तु नालोकयन् ।
क एष कमलोदरे महति निस्सहायो ह्यहं
कुतस्स्विदिदमंबुजं समजनीति चिन्तामगात् ॥ (9.2)

vedam nadam

अमुष्य हि सरोरुहः किमपि कारणं सम्भवेत्
इति स्म कृतनिश्चयः स खलु नालरंध्राध्वना ।
स्वयोगबलविद्यया समवरूढवान् प्रौढधीः
त्वदीयमतिमोहनं न तु कलेबरं दृष्टवान् ॥ (9.3)

ततः सकलनालिकाविवरमार्गगो मार्गयन्
प्रयस्य शतवत्सरं किमपि नैव संदृष्टवान् ।
निवृत्य कमलोदरे सुखनिषण्ण एकाग्रधीः
समाधिबलमादधे भवदनुग्रहैकाग्रही ॥ (9.4)

शतेन परिवत्सरैर्दृढसमाधिबंधोल्लसत्-
प्रबोध विशदीकृतः स खलु पद्मिनीसम्भवः ।
अदृष्टचरमद्भुतं तव हि रूपमन्तर्दृशा-
व्यचष्ट परितुष्टधीर्भुजगभोग भागाश्रयम् ॥ (9.5)

किरीटमकुटोल्लसत्कटकहारकेयूरयुक्-
मणिस्फुरितमेखलं सुपरिवीतपीताम्बरम् ।
कलायकुसुमप्रभं गलतलोल्लसत्कौस्तुभं
वपुस्तदयि! भावये कमलजन्मने दर्शितम् ॥ (9.6)

श्रुतिप्रकरदर्शितप्रचुरवैभव! श्रीपते!
हरे! जय जय प्रभो! पदमुपैषि दिष्ट्या दृशोः ।
कुरुष्व धियमाशु मे भुवननिर्मितौ कर्मठां
इति द्रुहिणवर्णितस्वगुणबृंहिमा पाहि माम् ॥ (9.7)

लभस्व भुवनत्रयीरचनदक्षतामक्षतां
गृहाण मदनुग्रहं कुरु तपश्च भूयो विधे! ।
भवत्वखिलसाधनी मयि च भक्तिरत्युत्कटे-
त्युदीर्य गिरमादधा मुदितचेतसं वेधसम् ॥ (9.8)

शतं कृततपास्ततः स खलु दिव्यसंवत्सरान्
अवाप्य च तपोबलं मतिबलं च पूर्वाधिकम् ।
उदीक्ष्य किल कंपितं पयसि पंकजं वायुना
भवद्बलविजृंभितः पवनपाथसी पीतवान् ॥ (9.9)

तवैव कृपया पुनः सरसिजेन तेनैव सः
प्रकल्प्य भुवनत्रयीं प्रववृते प्रजानिर्मितौ ।
तथाविधकृपाभरो गुरुमरुत्पुराधीश्वर!
त्वमाशु परिपाहि मां गुरुदयोक्षितैरीक्षितैः ॥ (9.10)

॥ इति जगत्सृष्टिप्रकारवर्णनं नवम दशकम् संपूर्णम् ॥

vedam nadam